गवती परा तदनुसंधानमित्युक्तं तत्तादात्म्यविम
र्शने मंत्रवीर्यमिति प्रोक्तं पूर्णाहंताविमर्शने
तदीयोनुभवस्तस्य स्फुरणं स्वात्मनः स्फुटमिति
एतत्त्वविद्याशरीरस्फुरत्तामंत्ररहस्यमिति सूत्रभ
गवता श्रीक्षेमराजेन विस्तरेण स्फुटीकृतं ९९ ॥
किरिचक्ररथारूढदंडनाथापुरस्कृता ज्वालामा
लिनिकाक्षिप्तवह्निप्राकारमध्यगा ७८ किरिर्व
राहः कोलः पोत्री किरः किटिरित्यमरात् तदाकृ
तीनि तदाकृतीनि वा चक्राणि यस्य तेरथमारू
ढया दंडनाथया वाराह्याख्यया देव्या पुरस्कृतासे
विता सर्वदा दंडपाणित्वाद्दंडनाथेति गीयत इति
त्रिपुरासिद्धांते दंडनाथनामनिर्वचनात् अ
थवा किरय इति किरणाः स्वरूप इति यावत् इद
मुपलक्षणं स्थितियोः तेषां चक्रं समूहरूपं वर
थः तस्यारोहेपि दंडनाथेन कृतो तेनापुरस्कृता
तत्स्वाधीनीकृता सृष्टिस्थितिलयांतः पातिनोपि
योगीनयमयातना विषयः स्वात्मानुसंधानरू

ल॰
स॰भा॰
५७

57

तिपावत् तथा च सूत्रे तत्स्वहन्तावप्यनिरासः स्व
संवेद्यभावाइति व्याख्याने च भगवताहस्मदासे
न तेषां रूपादिभावानां प्रहन्तावप्यनारतत्त्व
ज्ञनेपि तिक्षेपयोगावष्टंभशालिनः प्रतिरासः
स्वसंवेद्यभावादप्रच्युतिर्निजात् उद्यत्तदीयचमत्का
राडुपलब्धस्वभावत इति ज्वालामालिनीनामि
काचनद्देशीति स्थितिस्था तथा श्रीमानरमभितो
वह्निमयः प्रकारो निर्मितः तथाह्निमस्य निर्मित
स्य वह्निमयस्य प्राकारस्यावरणस्य मध्यगा मध्य
भागोस्थिता तथा च ब्रह्माण्डे ज्वालामालिनीप्रति
देवीवचने वत्सत्ववह्निरूपसि ज्वालामालामया
हृतिः त्वयाविधीयतो रक्षाबलस्यास्य मह्नीयसः
शतयोजनविस्तारः परिहृत्य महीतलं त्रिशाद्या
जनने सु तज्ज्वालाप्राकारतो व्रजेत्पारि यद्वानतु
परस्परविलक्षणरूपादिसंहननस्यापि ज्ञानिनः
कथमद्वैतानुसंधानलोपाभावइत्यत आह ज्वा
लेति ज्वालानां मालिनीकामालः तास्वश्चात्तिमा
स्तत्तोऽप्यन्त्राश्च वह्नेः प्राकाराः प्राकाराः स्फु
लिंगादयस्तेषां मध्यगान्तरष्टैव च मध्यवर्ति
नीविवदमानयोर्द्वयोर्मध्यस्थत्रिविकारा २

स्यादिकर्तृत्वेनतद्धिकार्यस्यविकारित्वमितिया
वत् तदुक्तंस्पन्दशास्त्रे अवस्थायुगलंचात्रका
र्यकर्तृत्वशब्दिते कार्यताक्षयिणीतत्रकर्तृत्वंपु
नरक्षयं कार्योन्मुखःप्रयत्नोयःकेवलंसोत्रलुप्य
ते तस्मिन्लुप्तेविलुप्तोस्मीत्यबुधःप्रतिपद्यते
नतुयोन्तर्मुखोभावःसर्वज्ञत्वगुणास्पदः तस्यलो
पःकदाचित्स्यादन्यस्यानुपलम्भनादिति वह्नि
रूपस्यज्वालिनोविस्फुलिङ्गज्वालादिकल्पजगतः
कार्यस्यनाशेपिवह्नित्वरूपप्रकाशकत्वस्यप्र
काशात्मकत्वस्यप्रकाशात्मकत्वस्यवानहानि
रितिफलितार्थः नचशिवकार्यस्यत्वयिसत्त्वे
नाशिवनिष्ठकर्तृत्वस्यनाशाभावेसाधकस्ययो
गिनः किमायातमितिवाच्यं अस्यापिशिवकल्प
त्वेनतथापर्यनुयोगानर्हत्वात् शिवकल्पोजा
यतइतिसूत्रात् उक्तंचस्वशक्तिप्रचयोविश्वमि
तिसूत्रेवार्तिककारैः शक्तयोस्यजगत्कृत्स्नंश
क्तिमांस्तुमहेश्वरः इत्यागमादिशाविश्वंस्वश
क्तिप्रचयोयथा शिवस्यतत्समस्यापितथास्य
परयोगिनइति अथवा ज्वालामालिनिकास्व
शक्तित्रिकोणेषुपंचसप्तादिमानंसमरसभा

ल· स· भा ५८

58

वमापन्नानां वह्निप्रकाराणां शिव त्रिकोणानां
चतुर्णां मध्ये बिंदुरूपेणातिष्ठतीति तदुक्तमुत्तर
चतुःशतीशास्त्रे तच्छक्तिपंचकस्थालयेनाग्नि
चतुष्टये पंचशक्तिचतुर्वह्निसंयोगाच्चक्रसंभव
इति ३१।३८ मंडसैन्यवधोद्युक्तशक्तिविक्रमह
र्षिता निशापराक्रमाटोपनिरीक्षणसमुत्सुका
३९ मंडासुरस्य सैन्यस्य चतुरंगबलस्य वधे उद्यु
क्तानां संयतानां शक्तीनां विक्रमेण पराक्रमेण
हर्षिता यद्वा मंडो जीवभावस्तस्य सैन्यं तदनुगु
णा द्वैतविषयिणो हंतयस्तस्य वधे उद्युक्ताना
म् द्वैतहत्रिरूपशक्तीनां विशेषेणाक्रमः पाद
विक्षेपस्तेन हर्षिता स्थाने दोषो श्रावरणनाश
नं तदिहमुक्तं शक्तिसत्त्वे तदपरिज्ञाने स्वशक्ति
व्यामोहितता संसारित्वमिति तस्य स्वकर्तृकपं
चविधकृत्यस्यापरिज्ञाने स्वाभिः शक्तिभिः खेच
रीगोचरीदिक्चरीभूचरीसंज्ञाभिर्व्यामोहितत्वेन व
संसारित्वमिति तदर्थः तासां च शक्तीनां पशुभू
मिकाभिः शक्तिभिः खेचरीपतिभूमिकेति भूमि
काद्वैविध्येन प्रमात्रंतःकरणबहिःकरणविष
यभावापत्तिलक्षणाभेदद्वयवा एतद्वयोयुक्त

शाक्तयश्चेनद्रत्नरसस्तेकथिताः तत्परिज्ञानेचित्तमे
वोन्मुखीभावनचेतनपदाध्यारोहाश्चितिरिति
श्चेन्मुखीभावशाहेनहत्तिविशेषरूपाः शाक्तयउच्य
न्तइति ११ कामेश्वर्यादिचिद्रोन्तःपंचदशतिथिनित्या
ख्योदेवताः यासांमेवज्ञानाणिवेतेवराजेचक्रमेदनो
ड्गताः तासांपराक्रमस्यादोपोविलासोदमनकादि
वंद्दश्मोनपंचदशसेनानीवयपर्यंतत्लस्पनिरीह
णेसम्यगुलका पद्मेतिनित्याश्चनादिसिद्धाःस्वात्मशा
क्तयः चतुर्बाहाश्चपमायतानोत्रिंशात्संख्योकास्त
त्पराक्रमेतत्रणेडन्तरोत्तरसुत्सका सहजापिज्ञान
कलोन्मुखेनायामेवोत्साहंजनयेतीसती उक्तंच
योगवासिष्ठे सर्वाप्यवकलाजेतोरनभ्यासेननश्य
ति स्वयंज्ञानकलावेतः सहजानापिवर्धतइति
१३।१४ मंडपत्रवयोयुक्तबालाविक्रमनंदिता
मेत्रिशत्पवाविरचितविर्षययवयतोषिता ८० मं
डासरस्यपुत्रत्राणोवधेउयुक्तायाबालाख्यादेव्या
नववर्षीयाः स्वपुत्र्याविक्रमेणनंदितायाश्चा
उक्तंचचुलांडेताभिर्निवेद्यमानानिमादेवील
लितोविका पुत्रात्मजापदानानिकृत्वाप्रीति
समाययाविति १४ मेत्राणवायाश्चामलांव

ल० स० भा ५५

59

याविरचितेनविषंगाख्यस्यदैत्यस्यवधेनतोषि
ताविषंगविशुक्रौ भंडासुरभ्रातरौ तडक्रंव्रला
३ पुराभंडासुरोनामसर्वदैत्यशिखामणिः पूर्व
देवान्बहुविधान्यःसहेबेक्ष्ययापटुः विशुक्रंनाम
दैतेयवर्गसंरक्षणक्षमे शुक्रतुल्यविचारत्वेदक्षो
सेनसमंजसः वामांसेनविषंगावरष्टवान्भ्रात
गाढुभावित्याहि ७५ विशुक्रप्राणहरणवाराहीवी
र्यनंदिता कामेश्वरमुखालोककल्पितश्रीगणे
श्वरा ७६ विशुक्राख्यस्यदैत्यस्यप्राणान् हरतीति
हरणं तादृशेन वाराहीनामिकया दंडिनीदेव्यावी
र्येणपौर्येणानंदिता त्रिपुरासिद्धांते वाराहीपद
तिरस्क्रियैथावराहानंदनाथस्यप्रसन्नवान्महेश्च
ती वाराहीतिप्रसिद्धेयं वाराहवदनेन वेति पदे
भंडपुत्राः प्राणावादयोमलाः विकटं संगो विषया
भिलाषः विषंगच्छतीतिवा विश्वात्मक इति याव
त् प्रतनपवयोविषस्योत्तानशाक्तेहेतुश्चेति मंत्रे
विषयग्राहो विकटत्वाद्विषशाह्यो माहेश्वर्यादि
शाक्तिमंडलपरत्वेन देमराजहृत्त्रो व्याख्यातः वि
कुडं पुत्रं तेजोयस्य सजीवभावः विशेषेण शुक्र
शोकं रातिसंक्रामयतीतिवा प्रयस्मयादिवास्ट

षोडशादिवाह्यापदहृदयेषु शाड्वसिद्धिः वामा मंत्रिणी
वाराह्यश्वारूढेति विशेषाः ताभिस्तेषां हृदयेषु स्वा
त्मदेवतानुग्रहती ति तदिदमुक्तं बललाभे विश्व
मात्मसात्करोतीति शक्तिसूत्रे चितिरेव बलं तल्ला
भेऽन्मय स्वरूपाश्रयणे विश्वं स्वात्मदेवभासयती
ति तत्राख्यं तथा तदा रुद्रप्रथमांतेन तत्पयाजीव
संहृदय इति शिवसूत्रवार्तिककारैः तदिदमुक्तं वै
याप्तिमंवेतत्व स्वरूपिणी प्रारूढा प्रमितिः माचि
महिमर्शनतत्परा यस्य तस्यास्य तदिति प्रोक्ता
णवमलात्मनः अभिलषस्य रुद्रस्य तयाजीव
स्य संहृदय इति अस्य तनिमित्तेनानाविधेर्विघ्नैर्ययौ वि
तानदेवानवीत्य श्रीमाता तदा तत्पव सब भर्तुर्मु
खालोकनमात्रेणाप्यविंशत्यर्णे महागणपति
रिमादिनमूलेन तदीर्घविघ्नयंत्रं निर्भिद्य देवा मोवि
ताः उक्तं च ब्रह्माण्डपुराणे ततः सा ललिता देवी का
मेश्वरमुखं प्रति दृष्ट्वायोगमासमहसन्नातिवक्र
दावलिः तस्मा मंदस्मितरुचः कुंजरः कृत्तिमा
नुविकटक्रोडगलद्दानः कश्चिद्देवो व्यजृंभत तेपा
दि तदिदं नाम हृदयेनाह कामेश्वरमुखस्यपरशि
ववदनंचेद्दस्यालोकाभ्यां साकृतवीतगणं वंदि

ल॰
स॰भा॰
९॰

60

काम्यां कल्पितं तदस्या हितः श्रीमान्महागणेश्वरी
यया सा यदाह सूत्रोक्तो जीवन्नयोनिस्पत्वान्नशुभ
तस्याशंका जीवभावस्य तत्पयपरत्वेन समायते
कामेश्वरीति कामेश्वरः केवलो निर्गुणः शिवस्त
स्तुत्वालोकेन तदनुभवेन कल्पिते श्रीगणेश्वर
त्वं पुर्यष्टकाधीश्वरत्वं यया सा पुर्यष्टकप्रमातृत्वा
हंताभिमानविशिष्टस्य जीवपदवाच्यत्वेन तत्तादा
त्म्याभिमानस्य स्वात्मस्वरूपनिष्कर्षज्ञानजन्येन
पुर्यष्टकेश्वरत्वज्ञानेन नाशे विशेषणाभावप्रयु
क्तो विशिष्टाभाव इति भावः तदुक्तं भूतकंचुकी
तदा विमुक्तो भूयः पतिसमः पर इति शिवसूत्रे
वार्तिककारैः तदेवमुक्ताभिलाषस्य प्रशमाज्जीव
संज्ञये पुर्यष्टकप्रमातृत्वाभिमानगलनादसौ
देहारंभकैर्भूतैरस्पृष्टादिरहंपदं कंचुकीववि
शेषणमुक्तो निर्वाणभाग्यतः भूयोबाऽडल्पतः
पत्यासमोऽहं परमेष्ठिना तत्त्वरूपे समाविष्टश्चि
दानंदघनात्मके तत एव परः पूर्णः सम्यक्त
न्मयतां गतः स्वयमेवार्थः प्राक्सूत्रेऽप्युक्तः वि
दानंदलाभे देहप्राणादिष्ववभासमानेष्वपि वि
दैकात्म्यप्रतिदार्ढ्ये जीवन्मुक्तिरितिमध्यविका

साच्चिदानंदलाभश्चतुरश्रत्वेन मध्यविकासा
पायश्चिदानंदलाभे हेतुत्वेनोक्तः सहृद्वश्यमा
णमहागणेशपदेन ग्राह्यः यश्च मध्यविकासो
ऽपायस्ततोऽप्युत्तरत्रत्वे विकल्पत्रयादिरूपो व
र्णितेः सहकामेश्वरानुग्वालोकपदेनोक्तः प्रहर्षि
तेऽपि नैतत्तु चिदानंदलाभ उक्तः एतेषां निकर्ष
स्तु प्राप्याभिव्याप्यदयेत्तु संपेयो विस्तरभयान्नेहो
च्यते ११ । ८१ महागणेशानिभिन्नविघ्नयंत्रप्रह
षिता भंडासुरेंद्रेति सुव्यक्तशास्त्रप्रपत्रवर्षिणी ८२
महागणेशेन निःशेषेणाभिन्नैर्नाशितैः विघ्नयं
त्रैः प्रसहृसम्महृयंत्रणैः प्रकार्षेणहर्षिताग
सृतिमात्रायामेशिलापट्टे प्रलसादिदेवताष्टक
पुटितस्थलाष्टकोपेतदिगष्टके जपविघ्नानाम
यंत्रं विलिख्य देवीसैन्ये विशुक्रेण वितीर्णं तन्महा
गणपतिना चूर्णीकृतमिति ललितोपाख्याने
प्रसिद्धं १४ भंडनामासुरेंद्रेण दैत्यराजेन निर्मुक्ता
नां शस्त्राणामस्त्राणां च प्रतिकूलान्यस्त्राणि श
स्त्राणि च वर्षंतीति जितप्रा शस्त्रास्त्रयोर्भेदो यजुर्वे
दे धन्वा प्रहरणं शस्त्रं मुक्तं वस्त्रमितीरितमिति
एते महागणानामीश्वरत्वेनानात्मन्यात्मताना

ल॰
स॰भा॰
८१

61

नाभावाद्याविंशकाकृतिरूपाणां विभ्रनामधाम्ना
णांचपराहंतानुधाराह्नपप्रत्यसेनोर्घ्नेननामहृ
यमथ्यात्मरोत्यापिव्याख्येये ७१। ८२ करांगुलि
नवोत्पन्ननारायणदशाकृतिः महापाशुपतास्त्रा
ग्निर्निर्देग्ध्वापरसैनिका ८२ करांगुलयोवामकर
हृयस्यांगुलयोदश नामानवसंधिपूत्पन्नानारा
यणस्यदशाकृतयोमत्स्यादिदशावतारायस्याः
सा भेंडासुरेणसर्वासुरास्त्रेनामसलदैत्योत्पाद
नमस्त्रप्रयुक्ते तेनसोमकरावणबलिहिरण्या
क्षादयपत्नाःसंतोपयुध्येन ततोदेव्यादन्तहस्तांगु
ष्टादिवामहस्तकनिष्ठांतांगुलिनखेभ्यः क्रमे
णमत्स्यकूर्मवराहनृसिंहवामनभार्गवदाश
रथिहलधरकृष्णकल्किरूपदशावतारानुत्पा
यतेनिशुदिताः तदके दन्तणहस्तांगुष्ठनखोन्म
हारास्त्रःसमुत्थितः महामत्स्याकृतिःश्रीमाना
दिनारायणोविभुरित्यारभ्य दशावतारनाथास्ते
कृत्वेत्यक्रमेडक्षरं ललितोवानमस्कृत्यबद्धांज
लिपुटास्थितास्तेनेन पद्मेजीवसंबंधिन्याजाय
दादयोवस्थाः पंचेश्वरसंबंधीनिसृष्ट्यादीनिकृ
त्यानिचपंचेत्येवंदशाकृतयोपिनखमात्रेणोत्प

त्रामवंतीति अनायासेनोत्पद्यंतेइत्यत्रतात्प
र्ये नारायणशाहोजीवेश्वरयोरुपलक्षकः
दृष्टा शाहोवस्थापरः कतिशाहः कस्यपरोवा
द॰ अउत्तरात्पाशुपतास्त्रमेवोदयेभिन्नो महा
पाशुपतास्त्रमेवः पूर्वेईश्वरदेवत्योत्यः सदाशि
वदेवत्यः रुद्रादयः पिशाचांताः पशवः परि
कीर्तिताः तेषांपतित्वात्सर्वेशोभवः पशुपति
र्मतइतिलैंगात् पशुपतेः ईश्वरस्य सदाशिव
स्येदंपाशुपतं अस्त्रयत्मादित्वात्त्रपात्रत्रपटल
त्वाणोपप्रत्ययः महत्त्वनत्पाशुपतेवमहापा
शुपतं सदाशिवस्त्रनस्याग्निनातिदीप्ता अमर
स्यभंडस्यसैनिकाययासा पत्तेभ्यासततारनमे
तोत्तरोत्तरोत्पत्त्याउत्कृष्टा अचैतन्हत्रयपवमहा
पाशुपतास्त्राग्नयः अमरसैनिकाश्चाविपकहृ
त्तयः ८१। ८२ कामेश्वराग्निर्निदीप्तसभंडामर
सैनिका ब्रह्मोपेंद्रमहेंद्रादिदेवसैन्यनवैभवा
दपि कामेश्वरस्येदंकामेश्वरंमहापाशुपताद
स्त्रादप्यधिकमस्त्रं तस्याग्निनातिदीप्ताभंडासु
रेणसहिताः सभंडासुराः सैनिकाश्चान्यका
ल्पनदीयनगरनिवासिजनपरः तथावज्रसा

ल॰
स॰भा॰
८२

62

डे प्रत्येकशोऽवंतेडुष्टेति हन्ताशेषबांधवे क्रोधे
नप्रज्वलितेवज्रगाढिस्रवकारिणि महाहंसमहा
सत्वेभेडेचंडेपराक्रमे महाकामेश्वराख्येणामह
हादित्यवर्चसा गताहमकरोन्मातालिलिताप
रमेश्वरी तदस्यवहितेत्वीलैः शून्यकेतस्यपत्र
ने सखीकेचसबालेवसगोष्ठयनयान्यके ति
देयमासीत्सहमास्थलमात्रमशेषेन शून्यके
नस्वरेनामशून्यमासीयथार्थंतइति सभेडाख्य
रशून्यकैतिपाठोस्तिवेशुक्तः यद्वाप्रात्मारविदे
वनायावजीवदशायामेवसायुज्यमुक्तिप्राप्त
स्पशिवतल्पाश्रितिमियताप्रबंधेनकथयिबा
सांप्रतेप्रारब्धवशात्स्थितस्यदृपपराभासस्य
हैतभानस्यतन्नलेपनलिंगशरीरादिनासह
नाशमात्मत्वानेनवदनशिवमात्रावशेषमा
हकामीश्वरातिष्ठिदग्निः भेडाख्यरोहैतभानके
रोजीवभावः सैतिकालिंगशरीरादयः शून्य
केतिपाठेदृपपराभाससहैतभानसर्थः शून्य
वादिसंमतेशून्यमेववा जीवभावसहितस्य
शून्यभावस्याविदग्निनापगमेचिन्मात्रमवशि
ष्टमइतिसिद्धाति ८२ एवंभेडाख्यपीडितै

देवैः स्तुतासती भंडहननोत्थदेवकार्यं कृत्वा
तदंते संतुष्टैर्देवैः पुनः स्तुतेत्याह ब्रह्मेति ब्र
ह्मविष्णुशक्राद्यैर्देवैः सकृत्स्तुतेव भवं पराक्र
मो यस्याः भंडासुरहननोत्थे ब्रह्मादिभिः प्रा
र्थिता लालितावया पुनर्मन्मथो जीवित इति
कथाया ब्रह्मांडपुराणे स्मरणात् एतेन ब्रह्माद्यैः
संस्तुतेनपरिचितेन विभुत्वपरिछिन्नत्वे सर्वात्म
त्वं यथाशास्त्ररूपदेवतायाः सा ८३। ८४ हर
नेत्राग्निसंदग्धकामसंजीवनौषधिः श्रीमद्वा
ग्भवकूटैकस्वरूपमुखपंकजा ८५ हरस्य तृती
यनेत्रस्थेनाग्निना सम्यक्दग्धस्य भस्मीकृत
स्य कामस्य मन्मथस्य संजीवनौषधिः जीवातुः
विरक्तस्यापि कामीश्वरस्य स्वाभिमुखीकरणात्
अस्मिन्नवसरे देवा भंडासुरहननोद्यताः सर्वेपि
सेवितेयामाब्रह्मविष्णुपुरोगमा इत्यादिब्रह्मां
डपुराणात् एतेन पित्रा निर्भर्त्सितो बालो मातृ
वात्सल्यतः किल नित्यापायोप्यनुगृहीतः अनेनै
वाशयेनोक्तं ब्रह्मवैवर्ते हरौ रुष्टे गुरुस्त्राता गु
रौ रुष्टे न कश्चनेति नचनत्र हरिपदस्यापास्य
देवतोपलक्षणत्वेन त्रिपुरसुंदरीकोपात्त्राण

ल॰
स॰ भा॰
८३

63

कर्तृत्वं परमशिवस्यैव गुरुपरंपरावधित्वाहङ्क
मंनश्रुतवैपरीत्यमिति शाक्तं परशिवस्यापि
श्रीविद्योपासकत्वेनोपासनायाश्च गुरुमंत्रेण
योगात्तदपेक्षायां त्रिपुरसुंदर्या एवनकृतवशी
कारात् अत एव योगिनीहृदये शिवेनैव पार्व
तीं प्रत्युक्तं अन्यायेन न दातव्यं नास्तिकानां महे
श्वरि एवं त्वयाहमाज्ञप्तो मदिच्छारूपया प्रभो
इति प्रवर्तितं प्रतीच्छायाः कारणाशिवस्य प्रव
र्तिका भगवत्येवेति सिद्धं तस्मागुरुत्वं अत एव
गुरुमूर्तिरिति नामवत्सते शक्त्या विना शिवे
सूक्ष्मे नामयामन विद्यत इति च वचः शक्तिशा[illegible]
दिक्षाशक्तिविशिष्टस्यैव परशिवस्यादिनाथत्वे
ननेत्रेश्रगणानां त्रिपुरसुंदर्या गुरुमंडलान्त
रादिनाथपूर्वं गगनानप्रजनाद्यापतिबोधवका
शः तथा च महास्वच्छंदतंत्रे गुरुशिष्यपदे स्थित्वा
स्वयमेव सदाशिवः प्रश्नोत्तरपदैर्वाक्यैस्तंत्रं स
मवतारयदिति स्वयमेवेत्यनेन प्रकाशाविम
र्शयोर्विभजनेन परस्परं गुरुशिष्यभावः स्थि
तः प्रवर्तकत्वपक्षे देवीनिष्ठयोर्वक्तृत्वप्र
वर्तंते शिवनिष्ठयोर्गुरुत्वशिष्यत्वयोरवस्थे

दकेइतितद्भेदादविरोधः एतदेवद्योतयितुंम
दिच्छारूपयेतिविशेषणंप्रभुपदेनसंबोधनेच
वस्तुतस्तु आदिनाथादवर्गादिशक्तेर्वानाम्ना
द्वितीयस्थानेगणपतएवेति ततः पूर्वंपुनर्ग
णनापतिः सदाशिवनामकस्तृतीयगुरुःप्रत्या
दिनाथावच्छिन्नायावादिशक्तेरेवगुरुत्वाद्विती
यस्थानएवगणनीयत्वयाततयोः पौर्वापर्यं
विनिगमनाविरहोपीतिदिग्यद्वाहरणेहरः आ
त्मस्वरूपापहारः हरंतीतिवाहराः आत्मापहर्ती
रस्तेषांतेनानायकः सएवासमंताद्याशोग्रः
स्वस्वरूपाच्छादाकरणात् मूलास्तानामितियाव
त् तस्यमूलास्तानकत्वात् तेनसम्यग्दग्धोयः
कामःजीवभावापन्नःकामेश्वररूपआत्मातस्य
सम्यगावरणपराहत्यभावपूर्वकंजीवनेस्वस्व
रूपावाप्तावौषधिर्मूलिका एतदुपासनयावि
द्यारूपायाः विद्यानिहन्त्र्यास्वस्वरूपावाप्तिल
क्षणोमोक्षइतिभावः मन्मथस्यदाहात्पूर्वंश
रीरस्यजीवनएवपश्चादशरीरजीवनाद्दृष्टां
तादात्मनोपिपूर्वंबन्धएवमनोविद्यावशादात्म
शरीरस्यैवास्थितस्यतन्निहन्त्रावशरीरतापूर्वं

ल॰
स॰ मि॰
८४

64

कबलेकाग्रासिर्धन्यते ध्वनिनेचैवमेवशैवशा
स्त्राणिमाधिकरणे भूयःस्यात्प्रोक्तमिलनमिति
वार्त्तिकेपिगुनश्चप्रोक्तंचैतन्यस्वरूपमिलात्मके
परयोगाधिरूढस्यभवेत्परमयोगिनः भूयःस्या
दितिवाक्यस्यस्फुटएवायमाशयः याच्छिवत्वम
मुग्धोक्तं नापूर्वंनत्तयोगिनः स्वभावएवनस्तो
क्तेमायाप्रोत्थापितात्रिजात् नानाविकल्परोग
त्मात्यराभृतमिवस्वनः विमृहद्गुरुनिर्दिष्टप्रो
क्तोपायक्रमेणानन्त शिवत्वेव्यक्तिमेतीतिशिवे
नोदीरितेशिवमिति शक्तिशास्त्रानिमाधिकरणे
पि निजमेविदेवताचक्रेश्वरत्वस्यामिरिति ह
भावएवेति निजपदेनतथैवस्फोरितमिति ८४
रयतापूर्वंयेनदेव्याः परंरूपंसूक्ष्मतरत्वात्स्व
रूपात्परतोवक्तव्यमपिरहस्योक्तिविषयत्वात्स्थू
लरूपकार्येणभंडासुरवधेनमहत्त्वेपलिस्य
यापूर्वमेवोक्ताक्रमप्रथमेसूक्ष्मरूपंस्थूलरूपा
भिन्नत्वेनवर्णयति श्रीमहाभवेत्यादिना श्री
मदत्तानप्रदायकत्वादिमहात्म्यशीले वाकु
भवत्यस्मादिति समन्याचारभवनामकंरूटंप
चातुराणांमनुदायपवैकंमुख्यंस्वनिजंरूपंय

स्ययस्यतादृशे मुखपंकजे यस्याः तदुक्तं ने
त्रोष्ठाधरगलवर्णश्चालिवाचासंभूतिर्मुखमि
तिवाग्भववाख्यकूटमिति ८५ कंठाधःकटिप
र्यंतमध्यकूटस्वरूपिणी शक्तिकूटैकतापन्नक
स्याधोभागधारिणी ८६ कूटस्याधःकटिपर्यंतो
यस्यसमध्यभागः सएवमध्यस्थकामराजाख्य
स्यकूटस्यषडक्षरसमूहस्यस्वेनिजेरूपेयस्याः
पटद्र्प्पीतिष्मनीलोचने इतिवक्ष्यमाणयादपि
मनर्थीयः ८७ सर्जेनशक्तिसमाशक्तीनामेके
नकूटेनेवक्षरसमूहेनैकताममेदमापन्ने
कटेरधोभागंधारयतीतितथा तदुक्तं कामस्ते
हृदिवसतीतिकामराजेस्त्पष्टात्वान्नदतुनवाब
शक्तिकूटमिति ४७ । ८८ मूलमंत्रात्मिकामूल
कूटत्रयकलेवरा कुलामृतैकरसिकाकुलसंके
तपालिनी ८९ चतुर्विधपुरुषार्थमूलकारण
त्वान्मूलंपंचदशाक्षरी सैवमननात्त्रायतइति
मंत्रःआत्मास्वरूपंयस्याः तदुक्तं पूर्णाहंतानु
संध्यानात्मास्फूर्जन्मननरूपमंतः संसारक्षयकृत्त्रा
णधर्मतोमंत्रउच्यते इति ९० मूलस्यकूटत्रय
मेवोक्तरीत्याकलेवरंस्थूलरूपंयस्याः कूट

त्रयमेव चक्रे वं स्वरूपं पश्या इति वा एवं ब्र
ह्मांडांतर्गते रूपमुक्त्वा पिंडांडांतर्गते कुंड लि
न्याख्यं रूपं वक्तुमुपक्रमते साहि मूलाधाराख्ये
चक्रे सार्धत्रिवलयाकारेण सुप्ता सती योगि
भिरुत्थाप्य षट्चक्राणि ब्रह्मविस्वाग्रंथी
श्च भेदयंती सहस्रारं नीता सती तत्कर्णिकारू
पचंद्रमंडलादमृतं स्रावयति अयोगिभिर
पि भावनामात्रेण सर्वाप्येषा प्रक्रिया संपाद्यते
तत्प्रक्रियापराणि नामान्याह कुलमित्या
दिना कुलं सजातीयसमूहः मेयैकज्ञानवि
षयत्वरूपसाजात्यापन्नज्ञातृज्ञेयज्ञानरूप
त्रयात्मकः घटमहं जानामीत्येवं ज्ञानाकारा
तु ज्ञानभासनयानुव्यवसायापेक्षायां दीप
भासनाप्रदीपांतरापेक्षापन्नैः उक्तं चाचार्यभ
गवत्पादैः जानामीति तमेव भांतमनुभात्येत
त्समस्तं जगदिति ततश्च सा त्रिपुटी कुलमि
त्युच्यते तदुक्तं चिद्गगनचंद्रिकायां मेयमा
त्मितिलक्षणं कुलं प्रांततो व्रजति यत्र विश्र
ममिति ऊर्ध्वाधरभावेन विद्यमानेषु स्वच्छ
दंसंप्रदायोपपादितेषु द्वात्रिंशत्पत्रेषु सर्वाय

त्मनं पञ्चांत्रिपुरीसंबंधाभावात्कुलमुच्यते
तदुपरिस्थानि कुलसंबंधीति यद्वाकुः पृथ्वीत
त्वे लीयते तत्र तत्कुलमाधारचक्रं तत्संबंधाह्लादि
ण्याः सुषुम्णामार्गोपि अतः सहस्रान्तवदस्तने
शरीरं कुलमित्युक्तमिति स्वच्छंदसंग्रहोक्तापाशरी
रसंबंधिबाह्यानन्तकुलास्तेन तत्र सुषुम्नेतयारसिका
तद्भासाधारपरा ५· उपास्योपासकवस्तुजात
स्याविवेकेन माजात्यानत्समुदायप्रतिपादकंपु
स्तकमपि कुलं तथा च कल्पसूत्रे प्रयोगः कुलपुस्त
कानि च गोपयेदिति न कुलं कुलमित्याङ्गाचारः
कुलमुच्यत इति भविष्योत्तरपुराणवचना राचा
रोपि कुले तयोः संकेत तत्रत्यरहस्यानि पालय
निपस्युषन प्रकाशयति इति सांप्रदायिकपरंप
रायैव प्रकाशनेतं प्रवर्तत इति चेत्तथा ५१ । ८७
कुलांगना कुलांतःस्था कौलिनी कुलयोगिनी अ
कुला समयांतस्था समयाचारतत्परा ८८ कुलं
पातिव्रत्यादिगुणराशिशीलो वंशस्तत्संबंधिन्य
गना यथागमानत्येयमध्यविद्या जयति कथागु
मत्वात्कुलांगना तदुक्तं कुलार्णवे अन्यास्तु सक
लाविद्याः प्रकटा गणिका इव इयं तु शांभवी वि

66

यागत्मा कुलंवपुरिवेति भगवान्परशुरामोप्या
ह श्रमाविद्यावेशपाद्वाति प्रकराद्यादि ५२
कुलस्यांतःमात्रमेयमी मध्येमिति रूपेणास्थिता
कुलशास्त्रस्यमध्ये ज्ञेयत्वेन वास्थिता प्रतिगृहं
प्रतिदेहं प्रतिवंशं वा सम्यत्वेन तिष्ठति कुलेज
नपदेगृहे सजातीयगोत्रे देहेपि कलितंकु
लमिति विस्तृः तदुक्तं भविष्योत्तरपुराणे पूज
नेयाजनेदेवी स्थाने स्थाने पुरे पुरे गृहे गृहे शक्ति
पदेग्रामेग्रामेवनेवने ५३ इहगार्थस्य कुलपद
प्रत्नः संबंधसामान्यार्थेन ढिते कौलं तद्वती कौ
लिनी अथवा बाह्याकाशावकाशे वक्रंविलिख्य
तत्रपूजादिकं कौलमिति तूच्यते ५४ कुलेउ
त्तीर्थके यागः संबंधो स्या इति कुलयोगिनी कु
लान्तरमतकारैः कौलिनी कुलयोगिनीत्यष्टाद
शेषवनामत्वयउक्तंतत्रोपपत्तिं दर्शमेशानकेव
लामः ५५ सुषुम्नायाःस्थितेसहस्रारपद्मम
कुलमित्युच्यते नथावतल्लुदसंयहे ऊर्ध्वाधः
सुषुम्नायाःसहस्रदलसंयुतमित्यारभ्य पंक
जद्वयमीशानि कुलाकुलमयं शुभमित्युक्तं तद्
त्वात्तन्निष्ठत्वाद्वा कुलाकुलान्विपत्तेकुलं देहं वंशादि

केयस्याइतिवा दहराकाशावकाशेचक्रंविभा
व्य तत्रार्चनंसमयइतिरूढ्योच्यते सचसर्वैर्यो
गिभिरैकमत्येननिर्णीतोर्थइतिसंकेतेनरूपत्वा
दपिसमयः तत्प्रतिपादकत्वाद्वसिष्ठशुकसन
कसनंदसनत्कुमाराख्यैस्तंत्रपंचकमपिसमय
पदेनव्यवह्रियते तदुक्तंतत्प्रतिपाद्यतयातिष्ठ
ति यद्वा समेसाम्येयानीतिसमयः शिवःसम
यादेवीचतयोरैकश्लेषः साम्यंचपरस्परंशिवश
क्त्योःपंचविधं अधिष्ठानसाम्यमनुष्ठानसाम्यम
वस्थासाम्यंनामसाम्यं रूपसाम्यंचेति अधिष्ठाने
पूजाधिकरणंचक्रादि अनुष्ठानेसृष्ट्यादिकृत्यं
अवस्थानेनृत्यादिक्रियानाम भैरवादिरूपमाभ
रणादि अस्यचविस्तरोवासनासुभगोदयव्याख्या
नेलल्लेनकृतः तयोरंतेस्वरूपेतिष्ठति अंतःप्री
तेति केनाशेस्वरूपेतिमनोहरइतिविष्टः ५७
रुद्रयामलेदशभिःपटलैरुपदिष्टआचारः स
मयाचारइत्युच्यते यद्वादीक्षितस्यगुरुकटाक्ष
वशात्षड्विधैक्यचतुर्विधैक्यान्यतरानुसंधान
दार्ढ्येमहावेदाख्यसंस्कारेचमहानवम्यांजातेसौ
नपश्चान्मूलाधारादारभ्यनादेवीमणिपूरेप्रत्यक्षा

ल॰
स॰ भा॰
८७

67

भवति तां तत्रैव पाद्यादिभूषणांतैः उपचारैः संपू
ज्यानाहते नीत्वा तां हृल्लोत्तमभ्यर्च्य विशुद्धिचक्रे
नीत्वा तत्रस्य चंद्रकलारूपैर्मणिभिः पूजयित्वाज्ञा
चक्रे नीत्वा नीरज्य सहस्रदलकमले सरयामध्ये
सदाशिवेन संयोज्यति रक्कैरिणी प्रसायै समीप
मेरिरैस्वयं स्थित्वा यावद्भगवती प्रतिनिर्गता सती
मूलाधारकुंडे प्रविशति तावत्तत्रैव समये प्रती
तैस्तैस्त्याकारो गुरुस्तु विवेकवेद्यः समयाचारः तयो
रभूयविषयोरपि तत्परा शास्मसक्तौ ८८ । ८८ मू
लाधारैकनिलया ब्रह्मग्रंथिविभेदिनी मणिपूरा
न्तरुदिता विष्णुग्रंथिविभेदिनी ८९ मूलाधाराख्य
चतुर्दलपद्मं तत्कर्णिकायां मध्यविंदौ कुलकुंड
नामके मुखमाछाय कुंडलिनी तत्र सर्वदैव सम
तिष्ठति अत एवैतदाधारत्वात्सुषुम्णामूलत्वाच्च
मूलाधार इत्युच्यते स एवैको मुख्यो निलयो वा
सस्थानं यस्याः ९० षट्चक्रेषु प्रतिचक्रमाद्यंत
योर्द्वौ द्वौ ग्रंथी तत्र ब्रह्मग्रंथि द्वयं तावपिष्ठानीये
विशेषेण भिनत्तीति तथा १० इति श्रीभास्करानं
दकृते सौभाग्यभास्करे प्राथेन शतकोनाम द्विती
या तापिनी कला २ इति महत्पदवाक्यप्रमाणपा

रावारपारीणधुरीणसर्वतंत्रश्रीमत्प्रकाशानं
दनाथचरणाराधकेनभारस्वपनामकश्रीमद्गंभी
ररायदीक्षितसूरिसूनुनाभास्कररायेणभास्करा
नंदनाथ· दीक्षानामशालिनाप्रणीतेसौभाग्यभा
स्कराभिख्येललितानामसहस्रनामपरिभाषाभाष्येप्र
थमंनामशतकंनामद्वितीयाकला श्रीगुरुपादु
काजयति। नाभौदशदलपद्मेसामयिकपूजायां
मणिभिरत्नैः पूर्यतेभूष्यतेदेवीतितच्चक्रंमणि
पूरपदवाच्यं तस्यांतरधःस्थितेग्रंथिभिन्नोदिताप्र
कटिता १ तदुपरिस्थितेविष्णुग्रंथिंविभिद्याभि
नत्तीतितथा विष्णोर्मणिपूरचक्रस्थितत्वेनतद्ग्रं
थ्योर्विष्णुग्रंथिसंज्ञा २ एवंब्रह्मरुद्रग्रंथिसंज्ञेत्र
पिज्ञेये ८९ आज्ञाचक्रांतरालस्थारुद्रग्रंथिविभे
दिनी सहस्राम्बुजारूढासुधासाराभिवर्षिणी १०
भ्रूमध्येद्विदलपद्मेआज्ञापकस्यश्रीगुरोरवस्था
नात्ताचक्रसंज्ञा तावत्पर्यंतंमनोनिग्रहाभ्यासे
ईषद्ज्ञानोदयोभवतीतिवा आङीषदर्थकः त
दंतरालेतिष्ठतिरुद्रग्रंथिर्हृदयंहृदयगतानाह
तचक्रीयंविभिनत्तीतितथा अनुष्ठानेपतद्धेप
रीत्यमनुत्तरयंपाठक्रमादर्थक्रमस्यबलीयस्त्वात्

ल० स०भा० ८८

68

ग्रंथीश्चेति पंचीनकन्यायात् पद्माक्षीविद्यायांच
त्वारःखंडाः आग्नेयसौरसौम्यवैंद्वकलाख्यः त
एववाग्भवकामराजशक्तिद्वयीख्याश्च तेषां
चतुर्णांमध्येत्रयो हृल्लेखाख्या ग्रंथयः ताश्चति
स्रःक्रमेणरुद्रविष्णुब्रह्मसंज्ञकः तत्रयेभिन
त्तिनरंध्रैःप्रविशति तदभिधेयेत्यर्थः ४ सह
स्रसंख्याकाश्चरादलानियस्यतदंबुजंकमलंच
न्द्रंधायःस्थमातृका ५ सुधाधारानकर्णिकचं
द्रसंबंधिन्याश्चामारोयायाःसंपानस्तमभिवर्षति
९।१० तडिल्लतासमरुचिःषट्चक्रोपरिसंस्थि
ता महाशक्तिःकुंडलिनीचैतेनतनीयसी
तडित्सौदामिन्येवलतावल्लीतयासमारुचिःकां ११
तिर्यस्याः ७ षड्वयवकानिचक्राणीतिमध्य
मपदलोपीसमासः तेनद्विगोरितिङीप्प्रत्य
योनभवति तानिचमूलाधारस्वाधिष्ठानमणि
पूरनाहतविशुद्धाज्ञाचक्रनामकानि तेषामु
परिसहस्रारेसम्यक्स्थिता ८ महेऽत्सवेनत्र
त्यशिवशक्तिसमायोगरूपेणासक्तितत्परता
यस्याःमहदुद्भवउद्भवरूपमरः वह्नितेजस्या
सक्तियस्यावामउत्सवेतेजसोरितिविश्वः स

हृतीयासमंतात्सक्तिःसेगोयस्यावा ९ कुंड
लेयस्यास्त इतिकुंडलिनी शाक्तस्यायुज्जीगी
वा तत्वरूपेवतंत्रराजे मूलाधारस्थबंधा
त्मतेजोमध्येव्यवस्थिता जीवशक्तिःकुंडला
ख्याप्राणाकाराथतैजसी प्रसुप्तभुजगंकारा
त्रिरावर्तामहाद्युतिः मायाशीर्षांतंदंतीताशु
स्वरंतपतिशंखगे सुषुम्णामध्यदेशेसायदाक
णेहृदयस्यतु पिधायतत्प्रणोस्येनेंधनितस्य
तदास्यतिरित्यादि योगवासिष्ठेचूडालोपाख्या
ने पुर्यष्टकापराख्यस्यमनसोजीवनात्मिकां
विद्धिकुंडलिनीमंतरामोदस्येवमंजरीमिति
नामनिर्वचनेदेवीपुराणे ॥ यतःशृंगाटका
राकुंडलित्युच्यतेततइति यद्वावामभवजीव
स्यकुंडलिनीतिसंज्ञातद्रूपा १० बिसंकमल
नालंतदेवंतंतुस्तद्वततनीयसी अतिशयेन
कृशाकृतिः ११ कुलामृतैकरसिकेत्यारभ्य
यत्पर्यंतंसुक्तप्रक्रियासर्वापिस्पष्टीकृत्वा
वामकेश्वरतंत्रे भुजंगाकाररूपेणमूलाधा
रंसमाश्रिता शक्तिःकुंडलिनीनामबिसतंतु
निभाशुभा मूलकंदंफणाग्रेणदृष्ट्वाकमल

ल॰
स॰ भा॰
६५

69

कुंडवत् मुखेन पुच्छं संगृह्य ब्रह्मरंध्रं समवि
ना पद्मासनगतास्वस्थो गुदमाकुंच्य साधकः
वायुमूर्ध्वगतं कुर्वन् कुंभकाविष्टमानसः वा
य्वाघातवशादग्निः स्वाधिष्ठानगतो ज्वलन्
ज्वलनाघातपवनाघातैरुन्निद्रितोऽहिराट्
ब्रह्मग्रंथिं ततो भित्वा विष्णुग्रंथिं भिनत्त्यतः
रुद्रग्रंथिं विभेद्यैव कमलानि भिनत्ति षट् स
हस्रकमले शक्तिः शिवेन सह मोदते सावा
वस्था परा ज्ञेया सैव निर्हेतिकारणं ब्रह्मणो
पतिषयपि स्पृश्यते उत्तिष्ठ मा स्वपत अग्निभि
छंधमारुताः राज्ञः सोमस्यात्मा सः सूर्येणास
पुजोधमः इति इयं चोपनिषत्सर्वोपि भगव
नीपैव उपबृंहणाद्दर्शनात् ब्रह्मणो पति
षड्रीतेति शामला सहस्रनामसपाठाच्च पु
श्चिनामकानामुपासकानां परस्परमुक्तिरि
यं भारती सरस्वती विद्येति यावत् तत्संबंधि
नो भारताः हे स्त्री विद्योपासकाः उत्तिष्ठ उपा
स्तिकमेव प्रवर्तं धं मा स्वपत प्रमत्ता मा भूत
पंतर्मा विनश्यथैवा कुंडलिनी कर्मका विमो
पात् योजनीयो अग्निः स्वाधिष्ठानगताग्निः

नत्रेजोमयीकुंडलिनीमिछथं इच्छादंडेनाहत
मोत्थापयथं सूर्येणसयुजा विष्णुडानाहत
चक्रयोर्मध्यवर्त्तिसूर्यसहितेननेनाग्निडंक्षमो
दमयस्यडनस्पतियावत् सोमस्यउमयाराजरा
जेश्वर्यासहितस्य राज्ञोराजराजेश्वरस्यसहस्रा
रीयचंद्रमंडलांतर्गतस्यचार्थांदस्तनेनतस्मा
सोभवत्स्पत्न अग्निकुंडलिनीमुत्थाप्य सूर्य
कुंडलिन्यासंयोज्य ताभ्यांचंद्रमंडलशिवश
क्तिसामरस्येनद्रावयित्वातडस्याः प्यस्तनयारा
भिहिंसमानिसहस्रनाडीमार्गानापूर्यंतस्माभ
भवेत्यर्थः तमासमुत्पत्रआजसेरसमागमः
तथायत्कुमारीमेहूयते यद्योषित्पतिव्रता
परिहृयाकिंविक्रियते अग्निस्तदनुवेपति कुः
हप्रीनत्वंस्रियतेलीयते यस्मिंस्तकुलकुंडेकु
मारं तत्संबंधिनीकुमारीकुलकुंडलिनीमेहू
यतेमंदस्वरेणनदति अतएवरोदनावस्था
साहित्यात्कुलकुंडाडस्याप्यनस्योत्पत्तिरूपना
चमयउत्पन्नाकुमारीत्युच्यते योषितरुणीता
रुण्यलक्षणसूर्येणानाहतनाडपरिभागेसाहि
त्यात् पतिव्रतापतिंवरलरंअस्यंकामेश्वरव

लः
स॰भा॰
७॰

७०

नयति भुंक्ते पयोव्रतं ब्रह्मणास्येन्द्रादिप्रयोगात्
एवं कुमारतारकाणां संभोगैरिहं ष्ठुभेपी युवव
र्षणारूपमन्यदपि यत्किंचिन्माक्रियते करोति
तत्सर्वमग्निः स्थापितगतोः त्रुवेथति साथयति
अग्निज्वलनेनैव चंद्रमंडलद्रवादिति भावः प
तडुपहृह्णांमनत्कुमारतंत्रे एश्वयोनामसुत
यःश्रीविद्योपासकाभिष्यः संभूयोपदिशंत्येना
मुख्यापयतमाचिरमित्यते एवं लोकस्य द्वारम
वितेमत्यविवेज्योतिमद्भ्राजमानेमहस्वत् प्र
स्ततस्यथारवङ्यादोहमानेवरणेनोलोके स
पितोदयावितेमंत्रोपि लोकस्यबलेलोकस्य
हारंसाधनं अविज्योतिमहः शाहाअग्निसूर्यं वं
इकलावाचकः वरणशाहस्मरतियातोयोने
करोतीतिकुम्यस्यात्कुंडलिनीपरःसामान्येनषु
सका हपितात् तस्मात् हकारस्ययकारादेशो
विःशाहचकारलोपश्छंदोयमः कुंडलिनी
अरन्यादिस्थानमागतात्पतीसयाहविंकव
त्पसंमास्तस्मात्करोतित्यर्थः तदिदंमुपवंहिते
षुकसंहितायां पावकस्याचिषाभानोज्योतिषा
महसावियोः दाहमानस्यायायाराद्धि समाति

सहस्रायुधा गुणाधाराकुंडलिनीत्स्मानस्मात्तनो
त्वसेति श्रुत्रगुसंयच्चात्तथाचरतीतिचरणपरस्या
र्थः एवंवसिष्ठादिनेत्रेषुपहृहणानिदृष्टव्या
नि ९९ भवानीभावनागम्याभवारण्यकुठारिका
भद्रप्रियाभद्रमूर्तिर्भक्तसौभाग्यदायिनी ९२ भ
वेमहादेवेसंसारकामेवा आनयति जीवयति
तदुक्तंदेवीपुराणे निर्वचनाध्याये रुद्रोभावोभवः
कामोभवःसंसारस्सागरः तत्त्राणनादियंदेवीभ
वानीपरिकीर्तितेति यद्वाजलमूर्तेःपरमेश्वरस्य
भवइतिसंज्ञा तस्यपत्नीउषानाम्नीपुत्रःशुक्राख्यः
तदुक्तंलिंगपुराणे भवइत्युच्यतेदेवोभगवान्वेद
वादिभिः संजीवनेनलोकानांभवस्यपरमात्मनः
उषासंकीर्तिताभार्यासुतःशुक्रस्तुसूरिभिरिति
वायुपुराणेपि भवस्यायाद्वितीयातनूरापःस्मृते
तिवै तस्योषानामिकापत्नीपुत्रश्चाप्युशनाःस्मृत
इति भवशब्दनिष्पत्तिरपितत्रैव यस्माद्भवंतिभू
तानितास्यस्ताभावयंतिच भवनाद्भावनाच्चैवभू
तानांसंभवःस्मृतइति श्रुत्रत्ताप्यइत्यस्याद्भ्यइत्य
र्थः तस्मादापोभवःस्मृताइत्युक्तमपादात् भवे
जीवनरूपंजलमप्यानयतीतिजीवयतीतिभावा

नीयहाभवस्य हीत्यर्थैस्तुयोगलक्षणोऽङ्गीषु इंद्र
वरुणेत्यादिनानुगागमः इयंचस्थानेश्वराख्यपी
पीठाधिष्ठात्रीदेवता तदुक्तंपद्मपुराणे ब्रह्मोत्तर
शतदेवीतीर्थमालाध्यायेस्थानेश्वरभवान्याख्या
विल्वकेनामपत्रिकेति १२ भावनातावद्द्विविधा
शाब्दीभावनाआर्थीभावनाचेति तत्रशाब्दीवैदिक
शब्दनिष्ठाचार्थेच्छासमानयोगक्षेमा ईश्वरेच्छैवेति
मीमांसकवादकोलाहलेनिरूपितमस्माभिः आ
र्थीतुप्रवृत्तिरूपा कारकाणांपरस्परसंबंधरूपेत्य
पितचैवनिरूपितंताभ्यामगम्यागम्यावा कर्मभा
गोविषयइति वातज्जन्यचित्तशुद्धिरूपावेत्यर्थः
यद्वाभावनात्रिविधा तदुक्तंकूर्मपुराणे ब्राह्मीमा
हेश्वरीचैवतथैवाक्षरभावनातिस्रस्तुभावनारु
देवतंतंतेसततं द्विजाइतिग्रन्यत्रापि त्रिविधाभा
वनाब्रह्मन्प्रोच्यमानांनिबोधमे एकामद्विषयात
त्रद्वितीयाव्यक्तसंश्रया अन्यांचसगुणाब्राह्मीविज्ञे
यात्रिगुणात्मिकेति इदंवैदंयुक्तंप्रतिकर्मावतार
स्यभगवतोवचनं एतल्लक्षणानिष्कर्षश्चरत्नत्रय
परीक्षायांदीक्षितैःकृतस्तत्रैवावगन्तव्यः यद्वाज्ञा
नंसकलंप्रोक्तंततःसकलनिष्कलं उन्मन्यांते

परेश्यानेनिष्कलंचत्रियास्थितमिति योगिनीहृद
योक्तलक्षणशालिसौभावनाः नाभिगम्याज्ञेया १३
भवःसंसारएवारण्यमतिगहनत्वात् तस्यकुठारे
वकुठारिका द्वयोःकुठारइतिकोशात्स्त्रीलिंगत्वात्
तच्छत्रीत्यर्थः १४ भद्रंमंगलंप्रियंयस्याःभद्रोगज
विशेषस्तज्जातीयागजाःप्रियायस्याइतिवा १५ म
हाभाग्यामूर्त्तिःस्वरूपंयस्याः १६ भगाःश्रीकाममाहा
त्म्यवीर्ययत्नार्ककीर्तिषुइत्याग्नेयपुराणोक्ताभगप
दार्थाःशोभनायस्याःसासुभगाललितैवतस्याभा
वः सौभाग्यंतदभेदइतियावत् यत्तुपद्मपुराणे
इक्षवस्तरुराजश्चनिष्पावाजीरधान्यके विकारव
च्चगोक्षीरंकौसुंभंकुसुमंतथालवणंचाष्टमंतद
सौभाग्याष्टकमुच्यत इतिवचनेपरिगणितं तद
पिमंगलकार्योपयुक्तत्वाच्छ्रीकरत्वाद्वासौभाग्यमे
व सुभाग्यंनियतिर्यस्यास्तस्याभावोवासौभाग्यं
भक्तेभ्यस्तानिददातीतितथा १७ श्चेदंबोध्यं म
हासक्तिविस्तारभयेनतत्पर्यंतानिनवनामानिवरुण
इति बलाहरसतुरेणनिर्दिष्टानि तथाहि वररुचि
संकेतेयववर्गोष्ठानामिहनवानांमंतेस्तुकं का
लाढा टयोरेतिसूत्राभ्यांककारमारभ्यघकारम

ल·
स·भा·
७२

72

भिद्याण्यक्षराणिनवभवंति टवर्गवर्गीवण्येवमि
तिनदर्थः पीभुः पवर्गइक्षराणिपंचानांसंज्ञा पना
न्यक्षराणिनामसंख्यायोतकानि भ्रज्राट् भ्रवीरा
जःषोडशांतसंख्यावाचकाःभवंति प्रथमाःउका
रभ्रादौततउकारः पतद्वयंयस्मादक्षरात्परनस्त
दक्षरंसा भ्रकारेणसहितेनतयोर्नाम यथाकिऊइ
त्यनयोः कइतिसंज्ञारिट्उइत्यनयोः टइतिपीपास्तु
उव् फीकारात्परतः भ्रकारश्चेत्तद्युगलस्यउकारः
संज्ञा पकारात्परतश्चेत्तद्युगलस्यचकारः संज्ञाप्र
ह्येण संपुटीकरणस्यणइतिसंज्ञा पवंचवडणि
निसूत्रस्यडकारेणप्रुटितोवकारइत्यर्थः तेनड
वडइतिसिध्यति ततश्चफीहपिप्रकीङ्हइत्यष्टौ
वर्णाभवंति हेतामनीचक्ररहरी तत्रप्रथमनाम्न
आद्यमक्षरंपवर्गीयं तृतीयेनामाष्टाक्षरं तदाद्य
मक्षरंपवर्गीयं ततोहेत्रिपंचाक्षरे तदाद्येपवर्गी
येततः षष्ठेनामाष्टाक्षरंतदाद्यमक्षरंचपवर्गीयं
ततोहेचक्ररक्षरेतयोराद्येनामपवर्गीयादिमा
क्षरकं ततोष्टाक्षरमेकंनामतदाद्यमक्षरंचपव
र्गीयमिति पवंनवनामानीत्येतावत्सूत्रार्थइति
दिक् १२ भक्तिप्रियाभक्तिगम्याभक्तिवश्याभया

पद्म पुंराभवीशारदाराध्याशर्वाणीशर्मदायिनी
२३ भक्तिर्द्विविधा मुख्या गौणी चेति तत्रेश्वरवि
षयकोऽनुरागामुख्ये स्थितमहतिविशेषोमुख्यभक्तिः
तथाचभक्तिमीमांसासूत्रे सापरानुरक्तिरीश्वरे
इति अथातो भक्तिजिज्ञासेति सूत्रोपात्ता भक्तिश
ब्दार्थः तस्याः परेति विशेषणं परा मुख्या भक्ति
मुद्दिश्यानुरक्तिलक्षणत्वेन विधीयत इति तद
र्थः अत एव परेति गौणीं व्यावर्तयतीति भाष्यं
गौण्यां तु समाधिसिद्धिरिति सूत्रे गौणी भक्तिः
सेवारूपा कथिता तथा च गरुडपुराणे भज इत्य
षवै धातुः सेवायां परिकीर्तितः तस्मात्सेवा बुधैः
प्रोक्ता भक्तिः साधनभूयसीति तद्भेदाः स्मरणकी
र्तनादयो बहवः तेन भक्तिरष्टविधा ह्येषा यस्मि
न्म्लेच्छे प्रवर्तते स विप्रेन्द्रो यतिः श्रीमान् स मुनि
स च पण्डित इत्यादि गरुडपुराणीयो वचने भ
क्तिर्नवविधा राजन्नित्यादि भागवतवचने भ
क्तिर्दशविधा ज्ञेया पापारण्यदवोपमेति दशवि
धत्वप्रतिपादके बृहन्नारदीयवचनमन्यच्चैता
दृशामवयुत्यानुवाद एव ईदृशो भक्तिपदार्थः
प्रियो यस्याः सा तथा च शिवपुराणे कनकत्य

स्मरणस्य समं किं क्रियते नरैः बहिर्वाभ्यन्तरे वा
पि मयाभावो हि रक्ष्यत इति अत्र भावशब्देन वा
ल्मेवाद्यपाचेष्टाभ्यन्तरोभिप्रायश्च रक्ष्यते १८
भक्त्यासंराधनेन गम्या प्रत्यक्षा तथा च श्रुतिः प
रांचि खानि व्यतृणत्स्वयंभूस्तस्मात्पराङ् पश्यति
नान्तरात्मन् कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्त
चक्षुरमृतत्वमिच्छन्निति स्मृतिरपि योगिनस्तं प्र
पश्यन्ति भगवन्तं सनातनमिति ईश्वरप्रणिधाना
द्वेति योगसूत्रेऽप्येवं प्रणिधानपदस्य भक्तिपरत
या राजमार्तण्डे व्याख्यानात् ब्रह्मसूत्रमिति अपि
संराधने प्रत्यक्षानुमानाभ्यामिति अव्यक्तमपि
ब्रह्मभक्त्या प्रत्यक्षं भवति श्रुतिस्मृतिभ्यां तथा
अवगमादिति तदर्थः भक्त्या त्वनन्यया शक्य अ
हमेवंविधोऽर्जुन ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परं
तपेति भगवद्वचनेऽपि अत्र प्रवेष्टुमित्यनेन ब्रह्म
भावाख्यो मोक्ष उच्यते सोऽपि भक्त्यैव लभ्यत इत्यर्थः
तेन प्रकृते गम्यपदं प्राप्यपरत्वेनापि व्याख्येयं
ब्रह्मसंस्थोऽमृतत्वमेतीति श्रुतौ निष्ठापर्यायभ
क्तिवाचनात्संस्थापदेन तथा प्रतिपादनात् एतत्प
व भक्तिमीमांसायां तस्यामृतत्वोपदेशादि

त्तिसूत्रे ब्रह्ममीमांसायांतन्निष्ठस्यमोक्षोपदेशा
दितिसूत्रेच निम्नान्तेऽपि भक्तिलक्षणकथन
पूर्वकंतस्याखिलश्रुत्यर्थप्रदत्वमुक्तं उक्तल
क्षणसंपन्नेगुरौतस्योक्तयोग्यतया विद्यानुष्ठान
योस्थैर्यधियः संशयनाशनः नरकत्वात्समत
त्वेभक्तिरुक्ताखिलार्थदा यथाविहीनानियत
मिहामुत्रचङः॥विनाइति अथवा भक्तिलक्षण
नयागम्यावोध्या विशिष्टशक्तिकानांसत्यज्ञा
नादिपदानांनिर्धर्मकब्रह्मवाचकत्वायोगात्
श्रुतएवविशिष्टांवदन्ते· लक्षार्थोलक्षणाग
म्येनसर्वेषांवेकमेवमैति शायनस्यभक्तिपा
त्वत्वात्सवनाधिकारोहीति जैमिनीसूत्रभक्तिप
दस्यलक्षणायांप्रयोगः अस्माकीनेशिवत्वे
पि नमेशक्तिः श्रीमत्स्व हिपरमाणोरपितत्तोत
थापित्वद्भक्तिंव्यतनवमवहम्याकिमपि नमे
वाःक्रोशंतिप्रवचनमथापिप्रवहते यथालो
केभक्त्यापरशिवनभक्त्यास्वगतयेति १९ भक्ते
भक्तलक्षणायावश्यापरीपाना भक्त्यावशेति
वा स्वतंत्रापिशिवभक्तिपारतंत्र्यंत्वमसूपइति
वचनात् २० भयानिजलस्थलापिप्रयुक्तादीनि

सर्वाण्यपहंतीति भयापहा तथा च वायुपुराणे
अरण्ये प्रांतरे वापि जले वापि स्थलेपि वा व्याघ्र
कुंभीरचौरेभ्यो भयस्थाने विशेषतः आधिष्वपि
च सर्वेषु देवीनामानि कीर्तयेदिति २१ शांभोरि
यं स्त्री शांभवा नामियं माता वा शांभवी देवीभा
गवते अष्टवर्षा च शांभवीति कन्याविशेषस्य
नामोक्तं तद्रूपा वेत्यर्थः २२ शारदायां संवत्सरस्या
राध्या शारदे शरद्भूतो वर्षादौ वा आराध्या
अथ शरत्समाः संवत्सर इत्य त्रिपुराणात् शार
त्काले महापूजा क्रियते या च वार्षिकीति मार्कंडे
यपुराणे वर्षस्यादौ भवा वार्षिकीत्यर्थः वासं
ते नवरात्रे तु पूजयेत् रक्तदंतिकामिति रुद्रया
मलात् शारदैर्विशारदैः पंडितैः शालिन्याख्या
त्म विशेषशीलै वा राध्या शारदः प्रीत शुद्धेस्या
च्छालीने प्रतिभाविनीति मेदिनी अकारो वासु
देवः स्यादाकारस्तु पितामह इत्यनेकार्थध्वनि
मंजर्यामभिधानान्नाभ्यामाराध्येत्यपहरद्यस्ते
षामार्थसिद्धे शारदा चासावाराध्येति कर्मधार
यो वा तत्र शारदां शांतिकृतिः कालीपुराणे शा
रत्काले पुरा यस्मान्नवम्यां वा पितामहैः शार

दाक्षा समाख्याता पीठे लोके च नामत इति २३ स्थि
तिमूर्त्तेः परमशिवस्य शार्व इति संज्ञा तस्य स्त्री
स्वर्थेंद्रयोगलक्षणे ऽभीष्टानुगानामः मंगलस्य
माता स्वकेशी नाम्ने स्पर्थ्यः तदुक्तं लैंगे चराचरा
णां भूतानां धाता विश्वंभरात्मकः शार्व इत्युच्य
ते देवः सर्वशास्त्रार्थपारगैः विश्वंभरात्मनस्त
स्य शार्वस्य परमेष्ठिनः स्वकेशी कथ्यते पत्नी त
नुजोंगारकः स्मृत इति वायवीयेपि शार्वस्यात्
मीयात्तनामभूमीतनुः स्मृता पत्नी तस्य स्वके
शीति पुत्रश्चांगारको मत इति २४ शर्म सुखं वे
दयतीति तथा शर्म शातसुखानि चेत्यमरप्र
राणीयकोषः सुखं ददाति भक्तस्य स्वेनैवाश
मेदायिनीति देवीभागवतात् २५ । ९३ शांक
री श्रीकरी साध्वी शरच्चंद्रनिभानना शातोदरी
शांतिमती निराधारा निरंजना ९४ करोतीति
करः पचाद्यच् शं सुखस्य करः शंकरः यस्य वा
शंकरः तस्य स्त्री शांकरी तथा च कालिकापुरा
णे इति सर्गादिमध्यांतमहं शंभुं निराकुलं
स्त्रीरूपेणानुयास्यामि प्राप्य दक्षादहं जनुः त
तस्तु विश्वमायां मां योगनिद्रां जगन्मयीं शां

करीतिह्यविध्यंतिहृद्याणीतिदिवौकस इति २६
करोतीतिकरीश्रियःकरीश्रीकरी श्रीकरोविष्णुः
श्रीपरःश्रीकरःश्रीमानितिविष्णुसहस्रनामपाठा
त् तस्येयंश्रीकरीतिवा २७ अथपरिभाषायां षट्
चत्वारिंशन्नामानिविभज्यन्ते राजावत्सर्वलेन्द्रो
भूत्वाबलिरागमाद्विदशा गुणागणगौणागशा
गोमार्गोसगणोभवेत् ४४ वक्तरित्येकस्मिन्नर्थे
वक्तृस्वतरत्नाणिचत्वारिनामानिद्विदशाद्विस
हिताद्दशाग्रर्थत्रयेणनारदशानिनामानिद्वाद
शसहस्रमत्यत् साध्वीपतिव्रतासतीसाध्वीपति
व्रतेत्यमरःकालत्रयेपिपत्यन्तरयोगाभावात्ति
तरसाधारणपातिव्रत्यं तदुक्तंश्रीमदाचार्यभ
गवत्पादैः कलत्रवैधात्रकातिकतिभजेतेनके
वयः श्रीपार्वत्याःकोवानभवतिपतिकैरपि
यनैः महादेवंहित्वानवसतिसतीनामचरमे
ऊर्वाभ्यामासंगःकुरवकतरोरप्यसुलभइति
देवीभागवतेपि साध्वीत्यनन्यसामान्यपाति
व्रत्येनगीयमेइति २८। शारत्कालिकेनचंद्रेण
तुल्यमानंनेमुखंयस्याः २९ शोतनत्वकरणं पुणा
नेत्रकपोलाद्यवदेवदपदेशो ० शितिन्याने उदंयस्याः

साशान्तोदरी शान्तोदरस्यान्तेनगुह्यस्य हिमव
तोःपत्यं हैमवतीत्यर्थो वा ३ः शान्तिरस्यास्ती
ति शान्तिमती भक्तेशोत्थभावात् ३१ निर्गतआ
धारः अधिष्ठानान्तरं यस्याः सर्वजगदधिष्ठान
स्यानित्यत्वेनाधारेणतायोगात् अथवा निराधा
राख्यपूजास्वरूपा तथाच स्वच्छन्दसंहितायां पूजा
शब्दैः परायास्तु द्विविधा संप्रकीर्तितेत्युपक्र
म्य बाह्याभ्यन्तरभेदेन हे प्रिये मुख्या बाह्या या
वैदिकतान्त्रिकभेदेन द्विविधं सलक्षणं वर्णयि
त्वोक्ते पूजायामन्तरा सापि द्विविधा परिकीर्ति
ता साधाराचनिराधाराच निराधारा महत्तरा सा
धारायात्साधारेनिराधारात्संविदि आधारे
वर्णसंज्ञके विग्रहे परमेश्वरी आराधयेदति
प्रीत्या गुरुणोक्तेन वर्त्मना या पूजा सेविधिप्रो
क्ता साक्षात्तस्यां मनोलयः संविदेव पराशक्ति
र्नेतरापरमार्थतः अतः संसारनाशाय साक्षि
णीमात्मरूपिणीं आराधयेत्परांशक्तिं प्रपञ्चो
ल्लासवर्जितां सा तु भूत्वा स्वयं साक्षात्स्वात्मभू
तां महेश्वरीं पूजयेदादरेणैव पूजा सा पुरुषार्थ
देति ३२ अञ्जनेनाम कालिमा अविद्यासंगः इति

ल॰
स॰भा॰
७८

यावत् तमोरूपत्वेनावर्णीयमेण्यताद्दृश्यपात्
तथा च योगवासिष्ठे भावाभावे पदार्थानां हर्षा
मर्षविकारदा मलिना वासना या मसंगः प्रोह्ये
न कथ्यते इति निर्गतमंजनं यस्याः सा निरंज
ना अविद्यासंपर्काभाववतीत्यर्थः मिथ्यारू
पायाअविद्याया स्वाधिष्ठाने भावात् प्रतिपन्नो
पाधौ त्रैकालिकनिषेधप्रतियोगित्वस्यैव मि
थ्यात्वात् यद्वा नितरां जनं रागो रक्तिमा संतो ष
णं वा यस्या ३३ ३४ निर्लेपानि मलानि त्यानि रा
काराणि राकुला निर्गुणानि कलांशानानिष्का
मानि रूपलुवा ३५ लेपः कर्मसंबंधः सनिर्ग
तो यस्मात्तानेन स्मान्निर्लेपा तदुक्तं पञ्चवैभवखं
डे कर्मभिः सकलैरपि लिप्यते ब्रह्मविद्वर श्च
न सर्वथा पद्मपत्रमिवाद्भिरहो परब्रह्मविस्म
वरस्यन्त वैभवं गीतास्वपि लिप्यते न स पापेन
पद्मपत्रमिवांभसेति ३४ नित्यशुद्धे श्चिन्नो मा
लिन्यप्रमापायकत्वादविद्यैव मलस्तदभावा
दत्यन्तनिर्मला मलस्य मिथ्यात्वात् ३५ तदधिष्ठा
नं तु न तथेत्याह नित्याकालत्रयेप्यबाध्या नि
थ्या नित्याकालनित्या मेत्रत्र रूपा वा ३६ आकारस्य

सगुणरूपस्य कल्पितत्वान्निराकारा तदुक्तं वि
ष्णुभागवते सवैनदेवासुरमर्त्यतिर्यङ्न स्त्रीन
षण्ढो न पुमान्न जन्तुः नायं गुणः कर्म न सन्न चास
न्निषेधशेषो जयतादशेष इति ३७ आकुलेति भा
वप्रधानो निर्देशः अविद्यासंपर्कैर्व्याकुलत्वाभा
वान्निराकुला निर्गताव्याकुलत्वं यस्या इति वा
नादृशानां हरेति यावत् ३८ गुणशून्यत्वान्निर्गु
णा साक्षीचेता केवलो निर्गुणश्चेति श्रुतेः गुणा
नां शरीरधर्मत्वेन चिद्धर्मत्वाभावाच्च तदुक्तमस्म
त्परमगुरुणा योहि मतं तेन प्रतिनारदेन यदुक्तं च
मया देवी लक्षणैर्वर्जितेति च शृणु तस्यापि वा
क्यस्य सम्यगर्थविचारणात् लक्षणैर्देविकोलिं
कः शरीरैकाश्रयो गुणाः इयन्त्वनिर्गुणा देवी ते
वलक्षयितं त्वमेति ३९ निर्गता कलांशांशावा
स्तविका यस्याः अंशेनानाव्यपदेशादिति सत्त्वं
ममैवांशो जीवलोके इति स्मृतिस्तु कल्पितांशा
भिप्रायत्वादविरुद्धके निर्गुणचिंता वा निष्कले
ष्वच्यते तदुक्तं विज्ञानभैरवभट्टारकैः ध्यानेषा
निष्कलाचिंता निराधारा निराश्रया न तु ध्याने श
रीरस्य मुखहस्तादिकल्पनेति निष्कलानीति

ल॰
स॰ भा॰
७७

77

वा ४९ शान्ताशमवती निष्कलेनिष्कलं शान्तमि
तित्रिपुरोपनिषत् शाकारोंतोयस्यास्तद्रूपा ब्रह्म
तबीजात्मिकेतियावत् ५१ निर्गतःकाम इच्छाय
स्याःसानिष्कामा अवाप्ताखिलकामायास्तस्या
किंविषयाभवेदितिदेवीभागवतात् पूर्णमदः
पूर्णमिदमितिश्रुतेश्च निष्काममतीजिवा अप
गत्यादिषु ५२ उपप्लवोनाशःसनिर्गतोयस्याः
निःशेषणातिशयेनउपसमीपपवर्पिडोउप
प्लवोस्तत्स्ववर्णययासानिरुपप्लवा निर्वे
यादिपदेष्वतिशायार्थोनिरःप्रयोगात् तथा
चवारुणोपनिषदि आप्लवस्वप्रप्लवस्य योडी
भवजमामाङ्गरिति ५३ । ५५ नित्यमुक्तानिरा
कारानिष्प्रपंचानिराश्रया नित्यशुद्धानित्यबुद्धा
निरवद्यानिरंतरा ५८ नित्यमुक्ताः यस्याभक्ताः
सानित्यंयथातथामुक्तावा नित्यंमुंचति मुच्यते
वानित्यमुक्तस्याभावस्ततावा मोक्षस्तद्रूपेत्यर्थः
५९ निर्गताविकाराःसांख्यप्रसिद्धामहदाद्याः
योविंशतिर्यस्याः तदुक्तंसांख्येतत्त्वकौमुद्यां मू
लप्रकृतिरविकृतिर्महदाद्याःप्रकृतिविकृतयः
सप्त षोडशकस्तुविकारोनप्रकृतिर्नविकृतिः

शुरूसवइति ५४ निर्गताः प्रपंचाः क्लिष्टादि संचय
प्रतारणविस्तारायस्यांसानिष्प्रपंचा प्रपंचः सं
चयेप्रोक्तोविस्तरेचप्रतारणइतिविश्वः प्रपंचो
पशमंशिवमद्वैतंचतुर्थंमन्यतइतिश्रुतेः ५८
सर्वाश्रयस्याश्रयातरायोगान्निराश्रया ५७ वि
श्वंप्रतिष्ठितंयस्यांतस्याः नप्रतिष्ठितिवचनात्
कालत्रयेपिमालिन्याभावान्नित्यशुद्धा ५८ विद्रू
पत्वान्नित्यबुधा शुद्धबुद्धौजिनविशेषौ तौनित्यौ
यस्याः प्रसादादितिवाषड्दर्शनपूजायांजैनदर्श
नोपास्यत्वेनापिदेव्याःपूजादर्शनात् तदुपास्य
ताराना मकदेवीरूपेतियावत् ५९ निर्गतंप्रव
यंगर्हभावियकविकारजातंयस्याः निरवद्येति
रंजनमितिश्रुतेः अवद्यानरकानिर्गतायत्प्रसा
दादितिया तथाचकूर्मपुराणे तस्मादहर्निशंदे
वींसंस्मरेत्पुरुषोयदि नयात्यवद्यंनरकंक्षीण
शेषपातकइति लिंगपुराणेपि मायातांसेववा
रायास्तस्याविंशतिकोटयः नरकाणामवद्यानां
पच्यंतेतासुपापिनः अनाश्रिताभवानीयैःशंक
रंनीललोहितमित्यादि ६० अवकाशावधिभेद
च्छिद्राणांतरपदार्थाः तेर्विहितानिरंतरा संतर

ल॰
स॰भा॰
७८
78

मवकाशावधिपर्यानानन्यर्थिमेदत्वादर्थो द्वि
द्वात्मीयविनावच्छिसरमध्येस्पदान्तनिचेत्पमरः
यएतस्मिन्नुदरमंतरंकुरुतेथस्यभयंभवतीति
श्रुतेः ५१। ५८ निष्कारणानिष्कलंकानिरुपाधि
निरीश्वरा नीरागारागमथनानिर्मदामदनाशि
नी ५७ सर्वकारणस्यकारणांतराभावानिष्कार
णा सकारणंकारणाधिपाधिपोनचास्यकश्चिज्ज
नितानचाधिपइतिश्रुतेः निःशेषंकारणंप्रथ
मद्भवोयस्यामितिवा तजन्यानंदवतीत्यर्थः म
हापद्मवनेतस्यकारणानंदविग्रहामितिवच
नात् ५२ कलंकःपापंतदभावान्निष्कलंका श्रु
इमपापविद्धमितिश्रुतेः ५३ उपसमीपेस्थादधा
तिस्वीयंधर्ममित्युपाधिः उपसर्गेघोःकिःस्वीयंलो
हित्यंसामीप्यमात्रेणस्फटिकेसमर्पयज्जपाकु
सुममुपाधिः तद्वच्चित्तेभेदेनभाने॰ वियोवोपा
धिस्तद्रहितानिरुपाधिः यद्वा निष्कलंकत्वाय
साधारणधर्मेषुसाख्येषुदेव्यास्तादात्म्यनहेतत्वे
निरुपाधित्वंनामव्याप्यत्वासिध्यभावःसद्धेत्वरि
त्यर्थः सखंडोपाधिरखंडोपाधिश्चेतिद्विविधेरपि
धर्मैःशून्येतिवा ५४ मीमांसाशास्त्रेसाख्येशास्त्रे

चहिविधं सेश्वरं निरीश्वरं चेति तत्रभयरूपत्वा
न्निरीश्वरा सर्वे षामीश्वर्यादीश्वरांन्तरामावाद्धा
५५ रागद्वेषानदभावादकामसकलकामंन्नीरा
गा श्रयद्वेषप्रतिपत्तभावाद्वसपाह्यात्वरागइति
शांडिल्यसूत्रे भक्तेरागपदवाच्यत्वाभिधानात्तांनि
क्तांनेत्यर्थः नीरंजलमंगःपर्वतस्तद्भयरूपावा
५८ भक्तानांवैराग्यदानेनरागामपहंतीतिरागम
थना रहरागद्वेषाभिनिवेशाःक्लेशाइतियोगसू
त्रोक्तोरागोमत्सयनेन ५७ मदराहित्यान्निर्मदा ५८
मदंनाशयति मदनेदत्तरमशानीतिवामदनाशि
नी ५५ ६० निश्चिंनानिरहंकारानिर्मोहामोहना
शिनी निर्ममाममताहंत्रीनिष्पापापापनाशिनी
६८ चिंताशद्धःस्मृतिसामान्यवचनोपिडुःखजन
कस्मृतिविशेषेनिरूढलाक्षणिकः चिंताचिन्ता
समाज्ञेयाचिंनाधिचिंडुनादिका चिंतादहतिनि
र्जीवंचिंतादहतिजीवितमितिप्रयोगात् चिंता
चले चुल्लिकायामि तिविश्वकोशाच्चलम
प्यर्थः तद्भयराहित्यान्निश्चिंता ८० वैकारिकस्तै
जसश्चभूतादिश्चेत्यहंत्रिधेतिवचनात्त्रिविधोहंका
रस्तद्राहित्यानिरहंकारा ८१ मोहोवैचित्त्यनदभा

ल॰
स॰भा॰
७९
79

वान्निर्मोहामोहमेकत्वज्ञानदानेन ९२ नाशाय
तीतिमोहनाशिनी तत्रकोमोहः कः शोकए
कत्वमनुपश्यतइतिश्रुतेः ९३ ममशाहोममे
दमित्याकारकबुद्धिपरः सा च भेदज्ञानचाटितसे
वं यं सरस्वतो विषयीकरोति स्वामिनेनतदभावा
त्रिर्ममा ९४ ममतायास्मादृष्टणावुध्याहन्त्री ९५
पापराहित्यान्निष्पापा ९६ पापंनाशयतिस्वीय
विद्याजपादिनाभक्तानामितितथा तथाचवसि
ष्ठस्मृतिः विद्यातपोभ्यांसंयुक्तंब्राह्मणंजपनैत्य
कं सदापिपापकर्माणांमनोनत्रतिमुच्यते जा
पिनोहोमिनोचैवध्यायिनोतीर्थे नपरिवसंति
पापानियेचस्नाताःशिरोव्रतैःरिति पद्मपुष्कर
खंडे मेरुपर्वतमात्रोपिराशिःपापस्यकर्मणः
कात्यायनीसमासाद्यनश्यंतिक्षणमात्रतः दु
र्गार्चिनरतोनित्यंमहापातकसंभवैः दोषैर्न
लिप्यतेवीरपद्मपत्रमिवांभसेत्यादि देवीभाग
वतेपि छित्वभित्वाचभूतानिहत्वासर्वमिदंज
गत् प्रणम्यशिरसादेवींनसपापैर्विलिप्यते
सर्वावस्थागतोवापियुक्तोवासर्वपातकैः दुर्गां
दृष्ट्वानरःसद्यःप्रयातिपरमंपदमित्यादि ब्रह्मा

ड्वगालोपि वर्णाश्रमविहीनानां पापिष्ठानांच
णामपि यद्रूपध्यानमात्रेणाड्गृकृतं सुकृताय
नइति ९७।५८ निष्क्रोधा क्रोधशमनी निर्लोभा
लोभनाशिनी निःसंशया संशयघ्नी निर्भवा भ
वनाशिनी ५५ द्वेष्यस्याभावान्निष्क्रोधा नमे
द्वेष्योस्तिनप्रियइतिभगवद्वचनात् ८८ भक्ता
नामरिषड्वर्गान्तर्गतं क्रोधं शमयतिनाशयती
तिक्रोधशमनी क्रोधस्यदुष्टत्वमापस्तंवेनोक्तं
क्रोधयुक्तो यद्यजति यज्जुहोति यदर्चति सतस्य
हरतेसर्वमामकुंभमिवोदकमिति ९९ स्वभावत
मौदार्यान्निर्लोभा लोभः ३० सर्वगुणान्हन्तीति
निंदितंलोभंभक्तानांनाशयतीतिवा ३१ तत्र
राजेन्द्रकलहाणकथनदशायामसंशयः संश
यश्छिन्नरूपेतोगुरुमंत्रशास्त्रकानयो विशेषण
योर्लक्षणमुक्तं ध्वसंशयात्मानविनंत्याच्छिन्नत्याति
पादनादिति नाटशास्त्रविभेदादिदंनामद्वयंनिः
संशया ३२ संशयघ्नीति ३३ अथपरिभाषाया
मेकोनपंचाशन्नामानिविभजते गुणत्रविगो
स्तगाष्टगोमूलमयाभोगगौरवाभावे क्षणांग
महान्तोहिर्भवरहितनवाकचत्तविभाजोहो ५२

ल· स· भा· प·

80

हिरिति पंचाक्षरं नाम हृदयं एकस्मिन्नर्थे दशाक्ष
राणामेव परिशेषात् चतुरक्षरपदे चतुरक्षर
कनामधेयं चतुष्पाद्यष्टकपरे स्वप्रमन्यत् १२
उत्पत्तिराहित्याद्विर्भेवा अनादिमत्परब्रह्मेति
श्रुतेः ७४ भवं संसारं नाशयतीति तथा तथा
च शाक्तिरहस्ये नवम्यां शुक्लपक्षे वा विधिवद्भ
ङिकान्त्य हूतेन स्नापयेद्यस्तत्र सपुष्पफले
भृत्य दशपूर्वान्दशपरानात्मानं च विशेषतः
भवाब्धिवाक्यमुद्धृत्य ब्रह्मलोके महीयते कौ
र्मेपि सेवयाज्ञाविद्यात्तो च परमानंदमिच्छता
संसारतापाखिलान्निहंतीश्वरसंश्रयेति देवी
भागवतेपि अहं वै मत्पराभक्तानैश्वर्ययोग
मास्थितान् संसारसागरादस्मादुद्धराम्यचिरे
णातिति भगवतीवाक्यं यद्वा भवनाशिनीत
टस्थितं समाममदिति बृहज्जाबालोपनिषत्प्र
सिद्धनदीविशेषः ७५ ५५ निर्विकल्पा निरा
बाधा निर्भेदा भेदनाशिनी निर्नाशा मृत्युमथ
नी निष्क्रिया निष्परिग्रहा १० विकल्पः शून्य
विषयकं शब्दजन्यं ज्ञानं तथा च योगसूत्रं श
ब्दज्ञानानुपाती वस्तुशून्यो विकल्प इति तदु

त्वाद्येपि अनंतासत्यपिलक्ष्येज्ञानशाब्दः क
रोतिहीति फलपरीक्षायांगौणमस्तुं वेश्रापि
बुद्धिसिद्धं तदस्मदिति नेतिश्रांतातानिर्विक
ल्पा अत्रत्यादयः श्रांतायर्थेद्वितीयेतिसमा
सः तदितिऊमस्याशाब्दजन्यबोधे तेनति
र्विषयकतिस्यज्ञान रूपेतिफलितं अथ
वाविकल्पः प्रकारोनविद्यतेयस्यां चरमव
तीतद्रूपेति यद्वाविकल्पः कल्पः पक्षोवि
कल्पस्तदभाववती स्वविरुद्धपक्षानवभा
वात् सर्वस्यस्वाभिन्नत्वात् निर्विशेषेतिप
येवस्मिनोन्यर्थः अरूपवदेवहितत्प्रधान
त्वादितितार्तीयाकेब्रह्ममीमांसाधिकरणे
निर्विकल्पैकलिंगत्वायाः ब्रह्मणः साधित
त्वात् १८ नेदंरजतमितिज्ञानेनरजतत्वाधे
पीदंपदार्थस्यैवबाधाभावान्निराबाधा १९
अन्योन्याभावस्यप्रतियोगित्वसंबंधेनानुयो
गित्वसंबंधेनवाभावान्निर्भेदा तदुक्तंकौर्मे
नेहिमापरमाशक्तिरनंतापरमेष्ठिनी सर्व
भेदविनिर्मुक्ता सर्वभेदविनाशिनीति तत्रैव
स्थलांतरे शक्तिशक्तिमतोर्भेदं वदंत्यपरमा

ल·
स्तु· भा·
८१

थेतः अभेदेनानुपश्यंति योगिनस्तत्वचिन्त
का इति ७८ भेदज्ञाने भेदमेव वा अज्ञानं वा हरि
केन ज्ञानेन नाशयतीति तथा ७९ नाशा
नेस्तदभावात्रिनाशा समंज्ञानमनेनमिति
श्रुतेः ८० भक्तानामस्तेमघ्नातीति तथा अथ
कस्मादुच्यते मामस्तादिसमनन्वेप्राप्नोमि तथ
त्वंप्राप्नोति तिनिमत्वंप्राप्नोति सर्पफडो भवतीति
त्रैगुण्यनिषेधकेः ८२ विहितनिषिद्धरूपक्रि
यारहितात्रिविक्रिया अशरीरंवावसंतंनप्रि
याप्रिये स्पृशत इति श्रुतेः यद्वा क्रियात्वयमे
नेरितो वकर्त्रादिकारकभावमापन्ना तदुक्तंवि
ष्णुपुराणे यथा सन्निधिमात्रेण गंधः क्षोभाय
जायते मनसोनोपकर्तृत्वात्तथासौ परमेश्व
र इति ८२ निर्गतः परिग्रहो यस्मात् परिग्रहः
परिजने पत्न्यां स्वीकारमूलयोरिति मेदिनी ८३
निस्तुलानीत्रिविक्रमगानिरपायानिरतमया उत्ल
भाटर्गमाद्वर्गाङ्गः त्विहृद्धीसत्त्वप्रदा ८४ उपमा
भावात्रिस्तुलाहित्वद्धांतमिति त्रिगुणपरिषि
त ८४ नीलाम्बिकराः जलायस्याः ८५ अपा
योः त्तपश्चनाशसदृहीना ८६ प्रतियोनिके

दैत्यविनाशदाघहस्तङ्गयोगीति विश्वकोशात्
सादेश्येन निष्क्रमादिरहिताज्ञिरमया ८७ दुर्लभा
योगिनामप्यसाध्यत्वात् श्रवणेनमशक्यता
त् अदुर्गमेति विच्छेदः नविद्यते दुर्गमायस्या
इतितदर्थः दुर्गमाख्यदैत्यनाशप्रयोजिकेति
यावत् ८९ अनेनैवदुर्गा तदुक्तंमार्कण्डेयपु
राणेभगवत्यैव तत्रैवच वधिष्यामिदुर्गमा
ख्यमहासुरं दुर्गादेवीतिविख्यातितन्मेना
मभविष्यतीति इत्येभीमरथ्यातीरेसंनतिवे
त्रेवासिनी दुर्गापदनिरुक्तिर्देवीपुराणेपि
महावलादिभयेदुर्गैस्ताभ्रितारिपुसंकटे देवाः
शक्रादयोयेनतेनदुर्गाप्रकीर्तितेति इत्येव
वाराणस्यांमहावारुनामराज्ञेराज्ञेवरदानेन
तेनप्रार्थितामतीदैत्यनेनाम्नाराज्ञेवरदा
नेनप्रसिद्धासतीस्थिता तदुक्तंदेवीभागवते
तस्मैवरदानोत्तरं तत्प्रार्थनाप्रकारेण नगरे
मेतयामानः स्यात्वंसर्वदाशिवे दुर्गादे
वीतिनाम्नावैत्वंशक्तिरिहसंस्थिता नववर्षा
पिकन्यापिदुर्गेत्युच्यते तदप्युक्तंतत्रैव नव
वर्षाभवेदुर्गेतितेनतद्रूपावेसर्थः ९० दुः

ल.
स्वभा.
८२

त्वस्य सांसारिकस्य हन्त्री ९१ स्वात्मैहिकामु
ष्मिककैवल्यरूपाणि प्रकर्षेण दत्ते सा प्रदा ९२
एतस्य विस्तरः पञ्चमे पुष्पखण्डे चरमभागे षष्ठि
रध्याये द्रष्टव्यः १०१ दुष्टदूरा दुराचारशमनी
दोषवर्जिता सर्वज्ञा सान्द्रकरुणा समानाधि
कवर्जिता १०२ दुष्टानां दोषवतां दूरमप्राप्या
न भजेति कृतकेना देवी विश्वेश्वरी शिवाभि
ति देवीभागवतात् ९३ दुराचारशमनी विरु
द्धाचारं शमयतीति तथा वदन्ती च पुरश्चात्
नित्यकर्माननुष्ठानात् निषिद्धकरणादपि य
त्पापं जायते पुंसां तत्सर्वं नश्यति स्मृतमिति ९४
दोषैः रागद्वेषादिभिर्वर्जिता ९५ सर्वं जानातीति
सर्वज्ञा यः सर्वः सर्वविदिति श्रुतेः सर्वज्ञा स
र्ववेत्त्वादिति देवीपुराणाच्च ९६ सान्द्रा करु
करुणा यस्याः ९७ न तत्समश्चाभ्यधिकश्च दृ
श्यते इति श्रुतेः दर्शननिषेधेन तद्विषययोरे
व निषेधात्समानाधिकाभ्यां वर्जिता ९८ सर्व
शक्तिमयी सर्वमङ्गला सद्गतिप्रदा सर्वेश्वरी
सर्वमयी सर्वमन्त्रस्वरूपिणी १०१ बालाबग
लादित्रिविधशक्तिभेदात्सर्वशक्तिमयी बल

मथंजगादिमादाविवमयद्वेदार्थकोपि ५५ स
र्वाणिमंगलानियस्याः देवीश्रुणोत सर्वाणि
हृदयस्थानिमंगलानिशुभानिच ईप्सितानिद
दातीतितेनसासर्वमंगला शोभनानिचश्रेष्ठानि
यादेवीददातेहेभक्तानामार्तिहरणीतेनयंस
र्वमंगलेति १० इतिश्रीभास्करानंदकृतेसौभा
ग्यभास्करेद्वितीयशतकेनाम्नृतीया भूमिका
कला इतिश्रीमत्सदवाकेसादिभास्कररायकृ
तेललितासहस्रनामभाष्येद्वितीयेशतकेनाम
तृतीयकला ३ श्रीगुरुपादुकायैनमः ओं स्वर्गा
दिमोक्षान्तासङ्गतिः सतोक्षरणगतिञ्ज्ञानेवा
स्त्रोगतीर्वाप्रददानीतितथा यतिस्त्वतमेका
भवानीमभियुक्तोक्तैः पाश्मेत्रिकालंपूजयेद्यस्तु
चतुर्देशपातगापिच सगच्छतिपरंस्थानेयत्रदेवी
व्यवस्थितेत्यारभ्यदुर्गापूजोपकरणंस्वल्पंवाय
दिवाबहुकृत्वाविनावसारेणरुद्रलोकेमहीयते
१ इत्यन्तैश्चतुर्भिरध्यायैः प्रत्युपवारं ग्रुणकाम
विधिभिः क्रमेणसमस्तलोकैकगतिप्रतिपा
दकानिवचनानीहोपबृंहकत्वेनयोजयति श्रुत
यवसर्वस्वामिनान्याप्रैश्वरी २ ब्रह्मसूत्रविन्नवा

भित्वमभेदं विना न तिष्ठतीत्याह सर्वमयी ।
त्विमादि शिवो न तत्त्वाभिन्ना १ एतदेवावष्टमा
त्तुवदति त्रिभिः सर्वैस्सप्तकोटिसंख्याका मंत्राः
स्वरूपमस्याः श्रूयते च सुंदरीतापनीये पूर्वैस्त
ग्राभ्यामनेका जाता इत्यादिभिस्सप्तभिः सूत्रैः स
र्वमंत्रात्मकत्वं वर्णितं तद्ग्रंथे च प्रपंचितं ४ ११
नैव न्यायेन मंत्राणीति सूत्रवर्णितं च मेयमा
ह ११ सर्वयंत्रात्मिका सर्वतंत्ररूपा मनोन्मनी मा
हेश्वरी महादेवी महालक्ष्मी मृडप्रिया १४ सर्वेषा
यद्यागलादीनां यंत्राणामात्मा स्वरूपमेवात्मिका
प्रतिपाद्यादितीव ५ वामकेश्वरास्सर्वतंत्राण्येव स्व
मस्याः ८ भ्रूमध्यादष्टमं स्थानं ब्रह्मरंध्रादस्ति तं म
नोन्मनीति कथितं तद्रूपा तत्स्वरूपं स्वछंदसंग्र
हे याशक्तिः कारणत्वेन तदूर्ध्वे चोन्मनी स्मृता ना
त्र कालकलामानं न तत्त्वं न च देवता स्वनिर्वाणपर
शुद्धं रुद्रवक्त्रं तदुच्यते शिवशक्तिरिति ख्याता
निर्विकल्पा निरंजनेति विष्णोरुपनिषद्यपि
निरस्तविषयासंगं सन्निरुद्धं मनो हृदि ॥
यदा यात्युन्मनीभावं ॥

ल.
स भा.
८३
83

तदानन्दपरमंसंपदमिति हृत्कमारुदीयपि ध्यान
ध्यातृध्येयभावोयदानश्यति निर्भरं तदोन्मनी
त्वंभवति ज्ञानामृतनिषेवणादिति मनोन्मन
यते उत्कृष्टज्ञानयुक्तान्तिकुर्वन्ति इतिवा संधि
तार्थः ७ महेश्वरपदस्य त्रिगुणातीतत्वं देशकाला
वच्छेदकं तदुक्तं लैङ्गे तमसा कालरुद्राख्योर
जसाकनकाण्डजः सत्वेन सर्वगो विष्णुर्नैर्गुण्येन
महेश्वर इति अवच्छिन्नत्वमत्र तृतीयार्थः महे
श्वरस्य तद्भावो लक्षणा कालरुद्रादिरूपकर्मा
नुसागात् तेन तदवच्छिन्ना महेश्वरस्येयं मा-
हेश्वरी ८ महती च सा देवी च महादेवी महत्त्वे
वक्ष्यमाणागमस्य शरीरकत्वं तदुक्तं देवीपुराणे
बृहत्त्वस्य शरीरं यदप्रमेयं प्रमाणतः ध्यातं महे
तिपूजायां महादेवी ततः स्मृतेति अथवा दे
वस्तेतः शिवस्य महादेव इति संज्ञा तस्य पत्नी
त्वेन समानाधिकरिणी नाम्नी देवी स्यर्थः तथा च
लैङ्गे शिवस्तस्मैपि वस्तेनां प्रकृतिस्तेन विश्रुतः
सोमात्मको वृषे देवी महादेव इति स्मृतः सोमा
त्मकस्य देवस्य महादेवस्य सूरिभिः दयिता गौ
रिणी प्रोक्ता वृषभस्यैव शरीरज इति वीयवीयेति

ल·
स·भा·
८४
84

नाम्नादेवस्यमहतस्तंद्रमात्रस्तत्ररक्ष्मीपत्नीत
रोहिणीतस्यपुत्रश्चास्यबुधःस्मृतइति सेयंग
उक्तांचक्रतीर्थाधिष्ठात्रीदेवता शालिग्रामेम
हादेवीतिपाद्मपुष्करखंडेदेवतीर्थेषुपरिग
णनात् ५ तत्रैवचकरवीरेमहालक्ष्मीरितिप
रिगणितांदेवीमाह महालक्ष्मीःमहतीचसा
लक्ष्मीश्च महाविष्णोरियंपत्नी करवीरकलोको
लापुरमितिप्रसिद्धं अथवा श्रेविकाशेभूतेवेयं
तदुक्तंशिवपुराणे शिवंप्रलत्य तस्याकमेद
लाहूहाशक्तिर्माहेश्वरीपरा महालक्ष्मीरिति
ख्याताश्यामासर्वमनोहरेति त्रयोदशवर्षी
त्मककन्यारूपावा कन्यात्रक्रमस्त्रयोदशमा
हालक्ष्मीरितितेषामनकथनात् २१० मृडम
खिनेइतियानोविश्वस्यतिवर्तःसत्वगुणावतः
शिवस्यमृडइतिसंज्ञा जनसुखकृतेमतोहिको
मृडायनमोनमः इतिमहिम्नस्तवात्तस्यप्रिया
२११ १७४ महारूपामहापूज्यामहापातकनाशिनी
महामायामहासत्वामहाशक्तिर्महारतिः १७५ म
हरूपमहतरूपमेपस्यास्तकृष्टरूपयस्याः तदुक्तं वि
ष्णुपुराणेपरस्यब्रह्मणोरूपंपुरुषःप्रथ मंद्विज

व्यक्ताव्यक्ते तथैवामे रूपे कालस्तथापरं प्रधान
पुरुषव्यक्तकालानां परमेह्यियत् पश्यन्ति सू
रयः शुद्धं तद्विष्णोः परमं पदं प्रधानपुरुषःव्य
क्तकालास्तु प्रविभागशः रूपाणि स्थितिसर्गा
न्तव्यक्तिसद्भावहेतवः इति ॥ महतीव सापू
ज्या पूज्यानां शिवादीनामपि पूज्यत्वात् तथा
च ब्रह्म देवीभागवतयोः शिवब्रह्मविष्णुकुबे
रविश्वेदेववायुवसुवरुणाग्निशक्रसूर्यसो
मग्रह राक्षसपिशाचमातृगणादिभेदैस्तत
त्पूजनीयदेवीमूर्तिभेदो मंत्रशैलेन्द्रनीलम
णिगोप्यपितलकांस्यस्फटिकमणिक्यमुक्ताफ
लप्रवालवैडूर्यत्रपुसीसवज्रलोहविकाररूपो
विस्तरेण दर्शितः अत्राग्निशक्रसूर्यमातृका
मयीमेव प्रतिपूजयेति इतरथा सांख्ययो
जनीयं ॥ महान्ति ब्रह्महत्यादीनि पातकानि
नाशयतीति तथा तथा च ब्रह्मोत्तरखण्डे बहु
नात्र किमुक्तेन श्लोकार्थेन वदाम्यहं ब्रह्मह
त्याशतेनापि शिवपूजा विनाशयेत् महापात
कशैलेन्द्रवीरस्तेनैव कथ्यते इति निर्णयरत्नाव
